## निपातस्य च । (१३६/३६३८)

ऋचि इत्येव । निपातस्य च [1]ऋग्विषये दीर्घ आदेशो भवति । '[2]एवा ते' (ऋ. १०.२०.१०) । 'अच्छा' (ऋ. १.२.२) ॥

## अन्येषामपि दृश्यते । (१३७/३६३९)

अन्येषामपि दीर्घो दृश्यते, स शिष्टप्रयोगादनुगन्तव्यः । यस्य दीर्घत्वं विहितं, दृश्यते च प्रयोगे, तदनेन कर्तव्यम् । केशाकेशि । कचाकचि । जलाषाट् । नारकः पूरुषः ।

[७७४] शुनो दन्तदंष्ट्राकर्ण[3]कुन्दवराहपुच्छपदेषु ।

श्वादन्तः । श्वादंष्ट्रः । श्वाकर्णः । [4]श्वाकुन्दः । श्वावराहः । श्वापुच्छः । श्वापदः ॥

## चौ । (१३८/४१७)

चौ परतः पूर्वपदस्य दीर्घो भवति । चौ इति अञ्चतिर्लुप्तनकाराकारो गृह्यते । दधीचः पश्य । दधीचा । दधीचे । मधूचः पश्य । मधूचा । मधूचे । अन्तरङ्गोऽपि यणादेशो दीर्घविधानसामर्थ्यान् न प्रवर्तते ॥

## सम्प्रसारणस्य । (१३९/१००४)

उत्तरपदे इति वर्तते । सम्प्रसारणान्तस्य पूर्वपदस्योत्तरपदे दीर्घो भवति । कारीषगन्धीपुत्रः । कारीषगन्धीपतिः । कौमुदगन्धीपुत्रः । कौमुदीगन्धीपतिः । करीषस्य इव गन्धोऽस्य, कुमुदस्य इव गन्धोऽस्य, [5]'अल्पाख्यायाम्' (५.४.१३६/८७५), 'उपमानाच्च' (५.४.१३७/८७६) इति इकारः समासान्तः । करीषगन्धेरपत्यम् कारीषगन्ध्या । कुमुदगन्धेरपत्यम् कौमुदगन्ध्या, तस्याः पुत्रः कौमुदगन्धीपुत्रः । कौमुदगन्धीपतिः । 'इको ह्रस्वोऽङ्यो गालवस्य' (६.३.६१/९९९) इत्येतन्न भवति । व्यवस्थितविभाषा हि सा । अकृत एव दीर्घत्वे ह्रस्वाभावपक्षे कृतार्थेनापि दीर्घेण पक्षान्तरे परत्वाद् ह्रस्वो बाध्यते । पुनः प्रसङ्गविज्ञानं च न भवति, 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या. प. ४०) इति ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तौ

षष्ठाध्यायस्य तृतीयः पादः ॥

---

1. मन्त्रे ब. 2. एवा देव अच्छा ते ह. 3. कर्द क, कुर्द ब, कुक्कुट ह. 4. श्वाकर्दः क, श्वाकुक्कुटः ह. 5. अल्पाख्यायाम् – कौमुदगन्धीपुत्रः नास्ति फ.